नं. 1

# संजीव®

बुक्स

# संस्कृत-X

(कक्षा 10 के विद्यार्थियों के लिए)

माध्यमिक शिक्षा बोर्ड, राजस्थान के विद्यार्थियों के लिए

पूर्णतः नवीनतम पाठ्यक्रमानुसार

- माध्य. शिक्षा बोर्ड, 2026 के प्रश्न-पत्र का समावेश
- पाठ्यपुस्तक के सभी अभ्यास प्रश्नों का हल
- शिक्षा विभाग, राजस्थान द्वारा जारी प्रश्न बैंक के प्रश्नों का हल सहित समावेश
- सभी प्रकार के अन्य महत्वपूर्ण प्रश्नों का समावेश
- योग्य एवं अनुभवी लेखकों द्वारा लिखित

## 2027

संजीव प्रकाशन,
जयपुर

मूल्य : ₹ 280/-

प्रकाशक :
**संजीव प्रकाशन**
धामाणी मार्केट, चौड़ा रास्ता,
जयपुर-3
email : sanjeevprakashanjaipur@gmail.com
website : www.sanjivprakashan.com

© प्रकाशकाधीन

**मूल्य : ₹ 280.00**

*लेजर टाइपसैटिंग :*
**संजीव प्रकाशन (D.T.P. Department),** जयपुर

*चित्र सैटिंग :*
**एस. वी. कम्प्यूटर,** जयपुर

*मुद्रक :*
**मनोहर आर्ट प्रिन्टर्स,** जयपुर

★ ★ ★ ★ ★ ★ ★

❖ इस पुस्तक में त्रुटियों को दूर करने के लिए हर संभव प्रयास किया गया है। किसी भी त्रुटि के पाये जाने पर अथवा किसी भी तरह के सुझाव के लिए आप हमें निम्न पते पर email या पत्र भेजकर सूचित कर सकते हैं—
email : sanjeevprakashanjaipur@gmail.com
पता : प्रकाशन विभाग
संजीव प्रकाशन
धामाणी मार्केट, चौड़ा रास्ता, जयपुर
आपके द्वारा भेजे गये सुझावों से अगला संस्करण और बेहतर हो सकेगा।

❖ इस पुस्तक में प्रकाशित किसी त्रुटि के प्रति तथा इससे होने वाली किसी भी क्षति के लिए लेखक, प्रकाशक, संपादक तथा मुद्रक किसी भी रूप में जिम्मेदार नहीं हैं।

❖ सभी प्रकार के विवादों का न्यायिक क्षेत्र 'जयपुर' होगा।

# माध्यमिक शिक्षा बोर्ड, राजस्थान
# पाठ्यक्रम

## संस्कृत (तृतीय भाषा) एकं पत्रम्  कक्षा–10

इस विषय में एक प्रश्न-पत्र होगा जिसकी परीक्षा योजना निम्नानुसार है—

| प्रश्नपत्र | समय (घंटे) | प्रश्न-पत्र के लिए अंक | सत्रांक | पूर्णांक |
|---|---|---|---|---|
| एक पत्र | 3.15 | 80 | 20 | 100 |

| अधिगम-क्षेत्रम् | अंकभारः |
|---|---|
| अपठित-अवबोधनम् | 08 |
| रचनात्मकं  कार्यम् | 15 |
| अनुप्रयुक्तव्याकरणम् | 24 |
| पठित-अवबोधनम् | 33 |
| | 80 |

### (क) खण्डः–अपठितावबोधनम्  08

80–100 शब्दपरिमितः (एकः सरलः गद्यांशः)

(i) एकपदेन उत्तरम् (प्रश्न द्वयम्)  $1 \times 2 = 2$

(ii) पूर्णवाक्येन उत्तरम् (प्रश्नमेकम्)  $2 \times 1 = 2$

(iii) शीर्षकप्रदानम्  1

(iv) अनुच्छेदाधारितं भाषिकं कार्यम्  $1 \times 3 = 3$

(अतिलघूत्तरात्मकाः त्रयः प्रश्नाः)

(अ) वाक्ये कर्तृ-क्रियापदचयनम्

(ब) विशेषण-विशेष्य-चयनम्

(स) संज्ञास्थाने सर्वनामप्रयोगः अथवा सर्वनामस्थाने संज्ञाप्रयोगः

### (ख) खण्डः–रचनात्मकं कार्यम्  15

1. किमपि विषयं स्वीकृत्य प्रार्थनापत्रं/आत्मीयजनान् प्रति अनौपचारिकं पत्रलेखनम्  04
2. चित्राधारितं वर्णनम् अथवा संकेताधारितं संवादलेखनम्  04
3. अनुवादकार्यम्–हिन्दीभाषायाः षड्वाक्येषु चतुर्णां वाक्यानां संस्कृतभाषया अनुवादः  04
4. घटनाक्रमस्य संयोजनम् (क्रमरहितानां षड्वाक्यानां क्रमपूर्वकं संयोजनम्)  03

**अथवा**

संकेताधारितम् अनुच्छेदलेखनम् (षड्वाक्यानि)

| **(ग) खण्डः–अनुप्रयुक्त-व्याकरणम्** | **24** |
|---|---|

(प्रश्नाः–बहुविकल्पात्मकाः, रिक्तस्थानपूर्तिः, अतिलघूत्तरात्मकाः, लघूत्तरात्मकाः)
(10) (6) (2) (3)

**(i) संधिकार्यम्–** 03

स्वरसंधिः—वृद्धिः, यण्, अयादि, पूर्वरूपम्, पररूपम्।
व्यंजनसंधिः—श्चुत्व, ष्टुत्व, जश्त्व, चर्त्व, अनुस्वारः।
विसर्गसंधिः—विसर्गस्य उत्वं, रुत्वं, लोपः, विसर्गस्थाने श्, ष्, स्।

**(ii) समासः—** 03

तत्पुरुषः—विभक्तिः।

कर्मधारयः, द्विगुः, द्वन्द्वः, बहुव्रीहिः।

अव्ययीभावः (अनु, उप, सह, निर्, प्रति, यथा)

**(iii) कारकाणि–** 03

उपपद—विभक्तीनां प्रयोगाः, तेषां सामान्यनियमानां परिचयश्च।

**(iv) प्रत्ययाः—** 03

कृदन्ताः—तव्यत्, अनीयर्, शतृ, शानच्।
तद्धिताः—मतुप्, इन्, ठन्, त्व, तल्।
स्त्रीप्रत्ययौ—टाप्, ङीप्।

**(v) अव्ययपदानि–**सामान्य-परिचयम्, वाक्ये अव्ययानां प्रयोगः। 03

अपि, इति, इव, एव, उच्चैः, कदा, कुतः, नूनम्, पुरा, मा, इतस्ततः, यत्, अत्र, तत्र, कुत्र, इदानीम्, सम्प्रति, यदा, तदा, यथा–तथा, विना, सहसा, श्वः, ह्यः, अधुना, बहिः, वृथा, कदापि, शनैः, किम्, अधः, उपरि, नीचैः, पुनः।

**(vi) वाच्य-परिवर्तनम्**—केवलं लट्लकारे (कर्तृ-कर्म-क्रिया) 03

**(vii) समयलेखनम्**—अङ्कानां स्थाने शब्देषु (सामान्य–सपाद–सार्ध–पादोन)। 03

**(viii) अशुद्धि–संशोधनम्—**वचन–लिंग–पुरुष–लकार–विभक्तिदृष्ट्या संशोधनम्। 03

| **(घ) खण्डः–पठितावबोधनम्** | **33** |
|---|---|

(i) पाठ्यपुस्तकात् बहुविकल्पात्मक प्रश्नाः (षड् प्रश्नाः) $1 \times 6 = 6$

(ii) पाठ्यपुस्तकात् अंशत्रयम् (एकः गद्यांशः, एकः पद्यांशः, एकः नाट्यांशः)

प्रति अंशम्–(क) एकपदेन उत्तरम् (प्रश्नमेकम्) $1 \times 1 = 1$
(ख) पूर्णवाक्येन उत्तरम् (प्रश्नमेकम्) $2 \times 1 = 2$
(ग) भाषिककार्यम्—(अतिलघूत्तरात्मकौ द्वौ प्रश्नौ) $1 \times 2 = 2$
$5 + 5 + 5 = 15$

कर्तृ–क्रियापदचयनम्, विशेषणविशेष्यचयनम्, सर्वनामपदस्थाने संज्ञापदलेखनम्, पर्याय–विलोमपदचयनम्

(iii) पाठ्यपुस्तकात् पद्यांशस्य सूक्तवचनस्य वा हिन्दीभाषायां सप्रसंग भावार्थलेखनम् 2

(iv) अन्वयलेखनम्–रिक्तस्थानपूर्तिमाध्यमेन 2

(v) प्रश्ननिर्माणम् (त्रय:) 1 × 3 = 3

(vi) पाठप्रसंगानुसारं शब्दार्थचयनम् (बहुविकल्पात्मक प्रश्नद्वयम्) 1 × 2 = 2

(vii) एकस्य गद्यपाठस्य हिन्दीभाषायां सारलेखनम् 3

**निर्धारितपुस्तकानि :**

**शेमुषी**–द्वितीयो भाग:—राष्ट्रिय–शैक्षिक–अनु. परिषदा प्रकाशितम्

**नोट–** विद्यार्थी उपर्युक्त पाठ्यक्रम को माध्यमिक शिक्षा बोर्ड की Website पर उपलब्ध अधिकृत पाठ्यक्रम से मिलान अवश्य कर लें। माध्यमिक शिक्षा बोर्ड की Website पर उपलब्ध पाठ्यक्रम ही मान्य होगा।

# विषय-सूची

## शेमुषी–द्वितीयो भागः


| | | |
|---|---|---|
| **मङ्गलम्** | | 1 |
| **प्रथमः पाठः** | शुचिपर्यावरणम् | 2–15 |
| **द्वितीयः पाठः** | बुद्धिर्बलवती सदा | 16–25 |
| **तृतीयः पाठः** | शिशुलालनम् | 26–39 |
| **चतुर्थः पाठः** | जननी तुल्यवत्सला | 40–50 |
| **पंचमः पाठः** | सुभाषितानि | 51–67 |
| **षष्ठः पाठः** | सौहार्दं प्रकृतेः शोभा | 68–87 |
| **सप्तमः पाठः** | विचित्रः साक्षी | 88–99 |
| **अष्टमः पाठः** | सूक्तयः | 100–110 |
| **नवमः पाठः** | भूकम्पविभीषिका | 111–120 |
| **दशमः पाठः** | अन्योक्तयः | 121–131 |

**अपठित-अवबोधनम्**

80–100 शब्दपरिमिताः सरल–गद्यांशाः 132–150

**रचनात्मकं कार्यम्–**

1. प्रार्थनापत्रं/आत्मीयजनान् प्रति अनौपचारिकं पत्रलेखनम् 151–182
2. चित्राधारितं वर्णनम् 183–200
3. संकेताधारितम् संवादलेखनम् 201–225
4. अनुवाद–कार्यम् 226–243
   (हिन्दी वाक्यों का संस्कृत में अनुवाद)
5. घटनाक्रमस्य संयोजनम् 244–255
6. संकेताधारितम् अनुच्छेद–लेखनम् 256–263

**अनुप्रयुक्त-व्याकरणम्–**


| | | |
|---|---|---|
| (i) | सन्धिकार्यम् | 264–284 |
| (ii) | समासः | 284–302 |
| (iii) | कारकाणि | 302–321 |
| (iv) | प्रत्ययज्ञानम् | 321–338 |
| (v) | अव्ययपदानि | 338–350 |
| (vi) | वाच्यपरिवर्तनम् | 350–363 |
| (vii) | समयलेखनम् | 363–373 |
| (viii) | अशुद्धि-संशोधनम् | 373–384 |

# माध्यमिक परीक्षा, 2026

## तृतीय भाषा–संस्कृतम्

**समय : 3.15 ( सपादहोरात्रयम् )** **पूर्णाङ्काः 80**

**परीक्षार्थिभ्यः सामान्यनिर्देशाः —**

1. परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रस्योपरि नामाङ्कः अनिवार्यतः लेख्यः।
2. सर्वे प्रश्नाः अनिवार्याः।
3. प्रत्येकं प्रश्नस्योत्तरम् उत्तरपुस्तिकायामेव देयम्।
4. प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम्।

### खण्ड-अ

**1. बहुविकल्पात्मकप्रश्नाः–** (18×1=18)

(i) पाषाणीसभ्यतायां प्रस्तरतले के पिष्टाः सन्ति? 1
(अ) सरोवराः (ब) वानराः (स) लतातरुगुल्माः (द) महानगराणि

(ii) बुद्धिमती मार्गे गहनकानने कं ददर्श? 1
(अ) चोरम् (ब) व्याघ्रम् (स) वृक्षम् (द) श्रृगालम्

(iii) 'शिशुलालनम्' पाठानुसारेण कौ यमलौ स्तः? 1
(अ) कुशलवौ (ब) रामलक्ष्मणौ (स) रामकृष्णौ (द) रामविदूषकौ

(iv) 'जननी तुल्यवत्सला' इति पाठः कस्मात् ग्रन्थात् संकलितः? 1
(अ) रामायणात् (ब) महाभारतात् (स) रघुवंशात् (द) ऋग्वेदात्

(v) पिकः कस्य गुणं जानाति? 1
(अ) काकस्य (ब) निर्बलस्य (स) मूषकस्य (द) वसन्तस्य

(vi) कर्कशध्वनिना कः वातावरणम् आकुली करोति? 1
(अ) सिंहः (ब) पिकः (स) काकः (द) वानरः

(vii) 'सूक्तयः' पाठानुसारेण प्रथमः धर्मः कः? 1
(अ) विवेकः (ब) आचारः (स) अहिंसा (द) करुणा

(viii) 'तोयैरल्पैरपि करुणया भीमभानौ <u>निदाघे</u>।' अत्र रेखाङ्कितपदस्य प्रसङ्गानुसारं कोऽर्थः? 1
(अ) ग्रीष्मकाले (ब) शीतकाले (स) वर्षाकाले (द) वसन्तकाले

(ix) 'लोके + अस्मिन्' इत्यस्य सन्धिपदं किम्? 1
(अ) लोकोऽस्मिन् (ब) लोकास्मिन् (स) लोकेऽस्मिन् (द) लोकऽस्मिन्

(x) 'सञ्जाता' इत्यस्य सन्धिविच्छेदः अस्ति— 1
(अ) सम् + जाता (ब) सन् + जाता (स) सञ्ज + आता (द) सञ्ज + अता

(xi) अधोलिखितेषु यणसन्धेः उदाहरणमस्ति— 1
(अ) प्रकृतिरेव (ब) सञ्चरणम् (स) वयोऽनुरोधात् (द) खल्वेतत्

(xii) 'दशाननः' इति पदे कः समासः? 1
(अ) कर्मधारयः (ब) बहुव्रीहिः (स) द्विगुः (द) द्वन्द्वः

(xiii) 'अभितः' इति पदयोगे का विभक्तिः भवति? 1
(अ) द्वितीया (ब) तृतीया (स) चतुर्थी (द) पञ्चमी

(xiv) 'भय' इति योगे का विभक्तिः भवति? 1
(अ) द्वितीया (ब) तृतीया (स) चतुर्थी (द) पञ्चमी

(xv) 'स्वाहा' इति पदयोगे का विभक्तिः भवति? 1
(अ) द्वितीया (ब) तृतीया (स) चतुर्थी (द) पञ्चमी

(xvi) '____________पत्रं लिख्यते।' अत्र पूरणीयं समुचितं पदं किम्? 1

(अ) त्वम् (ब) युवम् (स) त्वया (द) यूयम्

(xvii) 'कृषक: प्रात: (8:15)__________ वादने क्षेत्रं गच्छति।' अत्र समुचितसमयवाचक: शब्द: क:? 1

(अ) सार्ध-अष्ट (ब) सपाद-अष्ट (स) पादोनाष्ट (द) पादोन सप्त

(xviii) 'राजपुत्र: <u>वसामि</u>' रेखाङ्कितपदस्य शुद्धरूपं किम्? 1

(अ) वसति (ब) वसन्ति (स) वससि (द) वसानि

2. निर्देशानुसारं रिक्तस्थानानि पूरयत–

(i) बहुभूमिकभवननिर्माणं न ............................। (कृ + अनीयर्) 1

(ii) अन्योऽपि ...................... लोके मुच्यते महतो भयात्। (बुद्धि + मतुप्) 1

(iii) 'निजबुद्ध्या ........................ सा भयात् व्याघ्रस्य भामिनी।' (विमुक्त + टाप्) 1

(iv) लोकानां पश्यताम् ..................... सर्वत्र जलोपप्लव: सञ्जात:। (इव, एव, यथा) 1

(v) एते पर्वता: .................... भूकम्पं जनयन्ति। (अपि, इति, यत्) 1

(vi) क्रुद्ध: सिंह: ........................ धावति। (इतस्तत:, उपरि, अध:) 1

3. अधोलिखितं गद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत।

एकं नगरम् आसीत्। तत्र राम: सोम: च इति मित्रद्वयम् अवसत्। राम: विद्याम् इच्छति स्म किन्तु सोम: धनम् इच्छति स्म। एकदा मित्रद्वयं विदेशम् अगच्छत्। राम: तत्र विद्याभ्यासम् अकरोत्। सोम: धनसम्पादनम् अकरोत्। अनेकानि वर्षाणि अगच्छन्। मित्रद्वयमपि स्वनगरं प्रति प्रातिष्ठत। मार्गे चोरा: सोमस्य धनम् अहरन्। नगरे महाराज: रामम् आहूय–"त्वं मन्त्रिस्थाने तिष्ठ" इति अवदत्। राम: मन्त्री अभवत्। सोम: तस्य सेवक: अभवत्।

(क) एकपदेन उत्तरत— (1×2=2)

(i) राम: किम् इच्छति स्म?

(ii) क: धनम् इच्छति स्म?

(ख) पूर्णवाक्येन उत्तरत— (2)

चोरा: कस्य धनम् अहरन्?

(ग) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। (1)

(घ) भाषिककार्यम्— (1×3=3)

(i) 'अहरन्' इति क्रियापदस्य गद्यांशे कर्तृपदं किम् अस्ति?

(ii) 'अनेकानि वर्षाणि अगच्छन्।' अस्मिन् वाक्ये विशेष्यपदं किम्?

(iii) 'सोम: तस्य सेवक: अभवत्।' अत्र तस्य इति सर्वनामपदस्य स्थाने संज्ञापदं लिखत।

## खण्ड-ब

4. अधोलिखितयो: वाक्ययो: अङ्कानां स्थाने संस्कृतशब्देषु समयलेखनं करणीयम्। (1+1=2)

(i) प्रतिदिनं प्रात:काले (9:30) .................... रेलयानं नगरं गच्छति।

(ii) अहं सायंकाले (5:45) ..................... क्रीडाक्षेत्रं गच्छामि।

5. 'अहं श्व: विद्यालयं गमिष्यति।' इति वाक्यं संशोधयत। 2

6. 'मोहन: ग्रामं गच्छति।' इति वाक्यस्य वाच्यपरिवर्तनं कृत्वा लिखत। 2

7. 'पीताम्बरम्' इति पदस्य विग्रहं कृत्वा समासस्य नामापि लिखत। 2

8. अधोलिखितस्य श्लोकस्य हिन्दीभाषायां सप्रसङ्गं भावार्थं लिखत। 2

एकेन राजहंसेन या शोभा सरसो भवेत्।
न सा बकसहस्रेण परितस्तीरवासिना॥

9. अधोलिखितस्य श्लोकस्य अन्वयं मञ्जूषात: पदानि चित्वा पूरयत। 2

अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौषधम्।
अयोग्य: पुरुष: नास्ति, योजकस्तत्र दुर्लभ:॥

अन्वय: – अमन्त्रम् (i).............. नास्ति, (ii)................. मूलं नास्ति, अयोग्य: पुरुष: (iii)....................., तत्र योजक: (iv)............... ।

| दुर्लभ:, अक्षरम्, नास्ति, अनौषधम् |
|---|

## खण्ड-स

10. निम्नलिखितेषु वाक्येषु रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत। (1×3=3)

(क) सर्वदा सर्वेकार्येषु बुद्धिः बलवती भवति।
(ख) वयोऽनुरोधात् शिशुः लालनीयः भवति।
(ग) नराणां प्रथमः शत्रुः क्रोधः अस्ति।

11. 'भूकम्पविभीषिका' इति पाठस्य सारं हिन्दीभाषायां लिखत। 3

**अथवा**

'जननी तुल्यवत्सला' इति पाठस्य सारं हिन्दीभाषायां लिखत। 3

12. अधोलिखितं गद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत।

'भयाकुलं व्याघ्रं दृष्ट्वा कश्चित् धूर्तः शृगालः हसन्नाह' – भवान् कुतः भयात् पलायितः?

व्याघ्रः – गच्छ, गच्छ जम्बुक! त्वमपि कश्चिद् गूढप्रदेशम्। यतो व्याघ्रमारीति या शास्त्रे श्रूयते तयाहं हन्तुमारब्धः परं गृहीतकरजीवितो नष्टः शीघ्रं तदग्रतः।

शृगालः– व्याघ्र! त्वया महत्कौतुकम् आवेदितं यन्मानुषादपि बिभेषि?

व्याघ्रः – प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो मामत्तुं कलहायमानौ चपेटया प्रहरन्ती दृष्टा।

(क) एकपदेन उत्तरत— 1
व्याघ्रः कस्मात् बिभेति?

(ख) पूर्णवाक्येन उत्तरत— 2
व्याघ्रः केन हन्तुम् आरब्धः?

(ग) भाषिककार्यम्— (1×2=2)
(i) 'धूर्तः शृगालः हसन्नाह' अत्र विशेषण पदं लिखत।
(ii) 'त्वया महत्कौतुकम् आवेदितम्' अत्र त्वया सर्वनामपदे संज्ञापदं किम्?

**अथवा**

अग्रिमे दिने स आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान्। न्यायाधीशो बंकिमचन्द्रः उभाभ्यां पृथक्-पृथक् विवरणं श्रुतवान्। सर्वं वृत्तमवगम्य स तं निर्दोषम् अमन्यत आरक्षिणं च दोषभाजनम्। किन्तु प्रमाणाभावात् स निर्णेतुं नाशक्नोत्। ततोऽसौ तौ अग्रिमे दिने उपस्थातुम् आदिष्टवान्।

(क) एकपदेन उत्तरत— 1
न्यायाधीशः कः आसीत्?

(ख) पूर्णवाक्येन उत्तरत— 2
न्यायाधीशः किम् अमन्यत?

(ग) भाषिककार्यम्— (1×2=2)
(i) 'सर्वं वृत्तम् अवगम्य' अत्र विशेष्यपदं किम्?
(ii) 'स निर्णेतुं न अशक्नोत्।' अत्र क्रियापदं किम्?

13. अधोलिखितं पद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत।

कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्।
वाष्पयानमाला संधावति वितरन्ती ध्वानम्।
यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम्॥

(क) एकपदेन उत्तरत— 1
केषां षङ्क्तयोः अनन्ताः?

(ख) पूर्णवाक्येन उत्तरत— 2
शतशकटीयानं कीदृशं धूमं मुञ्चति?

(ग) भाषिककार्यम्— (1×2=2)
(i) 'वाष्पयानमाला संधावति वितरन्ती ध्वानम्' अत्र क्रियापदं किम्?

(ii) 'कज्जलमलिनं धूमं मुञ्चति'। विशेषणपदं किम्?

**अथवा**

सम्पत्तौ च विपत्तौ च, महतामेकरूपता।
उदये सविता रक्तो, रक्तश्चास्तमये तथा॥

(क) एकपदेन उत्तरत— 1
उदयसमये अस्तसमये च क: रक्त: भवति?

(ख) पूर्णवाक्येन उत्तरत— 2
महतां कदा एकरूपता भवति?

(ग) भाषिककार्यम्— (1×2=2)
(i) 'उदये सविता रक्त:' अत्र विशेषणपदं किम् अस्ति?
(ii) 'सूर्य:' इति पदस्य पर्यायपदं गद्यांशात् चित्वा लिखत।

14. अधोलिखितं नाट्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत।

वानर: – (सगर्वम्) अत एव कथयामि यत् अहमेव योग्य: वनराजपदाय। शीघ्रमेव मम राज्याभिषेकाय तत्परा: भवन्तु सर्वे वन्यजीवा:।

मयूर: – अरे वानर! तूष्णीं भव। कथं त्वं योग्य: वनराजपदाय? पश्यतु पश्यतु मम शिरसि राजमुकुटमिव शिखां स्थापिता विधात्रा एवाहं पक्षिराज: कृत:, अत: वने निवसन्तं मां वनराजरूपेणापि द्रष्टुं सज्जा: भवन्तु अधुना। यत: कथं कोऽप्यन्य: विधातु: निर्णयम् अन्यथा कर्तुं क्षम:।

काक: – (सत्यङ्ग्यम्) अरे अहिभुक्! नृत्यातिरिक्तं का तव विशेषता यत् त्वां वनराजपदाय योग्यं मन्यामहे वयम्।

(क) एकपदेन उत्तरत— 1
नृत्यं कस्य विशेषता अस्ति?

(ख) पूर्णवाक्येन उत्तरत— 2
मयूर: वनराजपदाय कथं योग्य:?

(ग) भाषिककार्यम्— (1×2=2)
(i) 'मम राज्याभिषेकाय तत्परा: भवन्तु।' अत्र मम सर्वनामपदस्य संज्ञापदं किम्?
(ii) 'त्वां वनराजपदाय योग्यं मन्यामहे वयम्।' अस्मिन् वाक्ये कर्तृपदं किम्?

**अथवा**

राम: – वयस्य, अपूर्वं खलु नामधेयम्।
विदूषक: – (विचिन्त्य) एवं तावत् पृच्छामि। निरनुक्रोश इति क: एवं भणति?
कुश: – अम्बा।
विदूषक: – किं कुपिता एवं भणति, उत प्रकृतिस्था?
कुश: – यद्यवयोर्बालभावजनितं किञ्चिदविनयं पश्यति तदा एवम् अधिक्षिपति– निरनुक्रोशस्य पुत्रौ, मा चापलम् इति।

(क) एकपदेन उत्तरत— 1
'अपूर्वं खलु नामधेयम्।' इति कथनं कस्य अस्ति?

(ख) पूर्णवाक्येन उत्तरत— 2
सीता कुशलवयो: अविनयं दृष्ट्वा किम् अधिक्षिपति?

(ग) भाषिककार्यम्— (1×2=2)
(i) 'किं कुपिता एवं भणति?' अत्र क्रियापदं किम्?
(ii) 'निर्दय:' इति पदस्य नाट्यांशात् पर्यायपदं चित्वा लिखत।

## खण्ड-द

15. भवती राजकीय-उच्च-माध्यमिक-विद्यालय-अमृतपुरस्य दशम्या: कक्षाया: छात्रा रोहिणी अस्ति। भवत्या: ज्येष्ठभ्रातु: विवाहोत्सव: अस्ति, अत: स्वप्राचार्याय दिनद्वयस्य अवकाशार्थं प्रार्थनापत्रं लिखतु। 4

**अथवा**

भवान् व्योमकेश: अस्ति। स्वकीयं मित्रं प्रति संस्कृतसम्भाषण – शिबिरविषये अधोलिखितं पत्रं मञ्जूषापदसहातया पूरयित्वा लिखत। 4

| शिबिरे, व्योमकेशः, सादरम्, ग्रीष्मावकाशे, तत्राऽस्तु, उत्तमः, आयोजनम्, पूर्णतया |
|---|

गगनपुरतः

दिनाङ्कः : 23 फरवरी 2025

प्रियमित्र! धनेश!

......(i)......... नमस्ते।

अत्र कुशलं ......(ii)........ । संस्कृतसम्भाषणकौशलवर्धनाय प्रतिवर्षमिव अस्मिन् वर्षेऽपि मम विद्यालये संस्कृतसम्भाषणशिबिरस्य ......(iii)........ भविष्यति। एतत् शिबिरं ......(iv)........ निःशुल्कं भविष्यति। दशदिवसीयस्य एतस्य शिबिरस्य आयोजनं ......(v)........ जूनमासस्य प्रथमे सप्ताहे भविष्यति। सम्भाषणकौशलवर्धनाय एषः ......(vi)........ अवसरः अस्ति। भवान् अपि मया सह अस्मिन् ......(vii)........ भागं गृह्णातु।


अस्तु नमो नमः।

भवतः सुहृद्

......(viii)......

16. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन अष्टवाक्यानि लिखत। 4

| एकस्मिन् वने, वनराजः, जन्तवः, मन्चे, गोष्ठयाः आयोजनम्, चतुरः शशकः, वानरः, गजः |
|---|



**अथवा**

मञ्जूषायाः उपयुक्तानि पदानि चित्वा 'स्वास्थ्यविषये' सख्योः संवादं पूरयतु। 4

| शिरोवेदना, स्वीकृतवती, कुतः, औषधम्, समीचीनम्, आगच्छामि, स्वास्थ्यम्, अस्ति |
|---|

लता – भवती ......(i)......... आगच्छति?

वीणा – अहं चिकित्सालयात् ......(ii)........ ।

लता – इदानीं भवत्याः ......(iii)........ कथम् अस्ति।

वीणा – मम स्वास्थ्यं ......(iv)........ नास्ति।

लता – का वेदना ......(v)........ ?

वीणा – मम ......(vi)........ भवति

लता – ....(vii)..... स्वीकृतं वा?

वाणी – आम्, अहम् औषधं ....(viii).....।

17. अधोलिखितेषु वाक्येषु केषाञ्चन चतुर्णां वाक्यानां संस्कृतभाषया अनुवादं कुरुत। 4

(i) राजा भिक्षुक को धन देता है।

(ii) मैं पुस्तक पढ़ता हूँ।

(iii) गाँव के चारों ओर वृक्ष हैं।

(iv) अध्यापक व्याकरण पढ़ाता है।

(v) राम कल विद्यालय जायेगा।

(vi) बालक वन में गया।

18. अधोलिखितानि वाक्यानि क्रमरहितानि सन्ति। यथा क्रमं संयोजनं कृत्वा पुनः लिखतु। 3

(i) किन्तु द्राक्षाफलानि न प्राप्नोति।

(ii) लतायाम् अनेकानि मधुराणि द्राक्षाफलानि सन्ति।

(iii) कुपितः सः "द्राक्षाफलानि अम्लानि" इति वदति।

(iv) एकः बुभुक्षितः जम्बुकः आसीत्।

(v) सः द्राक्षां लब्धुम् उपरि उत्पतति

(vi) वने सः एकत्र द्राक्षालतां पश्यति।

**अथवा**

मञ्जूषायां प्रदत्तशब्दानां सहायतया 'परोपकारः' इति विषये एकम् अनुच्छेदं (षड्-वाक्यात्मकम्) संस्कृतभाषया लिखत। 3

| परेषामुपकारः, विश्वकल्याणम्, उदारः स्वार्थरहितः, वृक्षाः नद्यश्च, करुणापरः |
|---|

# संस्कृत–कक्षा–10

## शेमुषी-द्वितीयो भागः

### मङ्गलम्

(1)

**ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्।**
**पश्येम शरदः शतं जीवेम शरदः शतम्।**
**शृणुयाम शरदः शतं प्रब्रवाम शरदः शतम्।**
**अदीनाः स्याम शरदः शतम्। भूयश्च शरदः शतात्॥ ( यजुर्वेद 36.24 )**

**अन्वयः**–ॐ देवहितं तत् शुक्रं चक्षुः पुरस्तात् उच्चरत्। (वयं) शतं शरदः पश्येम। (वयं) शतं शरदः जीवेम। (वयं) शतं शरदः शृणुयाम। (वयं) शतं शरदः प्रब्रवाम। (वयं) शतं शरदः अदीनाः स्याम। च शतात् शरदः भूयः।

**कठिन शब्दार्थ–देवहितम्** = देवताओं द्वारा धारण किया हुआ। **चक्षुः** = नेत्र, आँख। **पुरस्तात्** = आगे, सर्वप्रथम, पहले स्थान पर, पूर्व में। **शरदः** = वर्ष। **अदीनाः** = जो दीन नहीं हों, स्वावलम्बी। **भूयः** = फिर से।

**हिन्दी अनुवाद/भावार्थ**–हे परमपिता परमात्मा! देवों द्वारा निरूपित यह शुक्ल वर्ण का नेत्र रूप (सूर्य) पूर्व दिशा में ऊपर उठ चुका है। हम सब सौ वर्षों तक देखते रहें, सौ वर्षों तक जीते रहें। सौ वर्षों तक सुनते रहें। सौ वर्षों तक शुद्ध रूप से बोलते रहें। सौ वर्षों तक स्वावलम्बी (अदीन) बने रहें और यह सब सौ वर्षों से भी अधिक चलता रहे।

(2)

**आ नो भद्राः क्रतवो यन्तु विश्वतो–**
**ऽदब्धासो अपरीतास उद्भिदः।**
**देवा नो यथा सदमिद् वृधे. अस-**
**न्नप्रायुवो रक्षितारो दिवे दिवे॥ ( ऋग्वेद 1.89.1 )**

**अन्वयः**–नः विश्वतः आ भद्राः क्रतवः यन्तु, अदब्धासः, अपरीतास, उद्भिदः (स्युः)। असन् अप्रायुवः सदमिद् रक्षितारः देवाः दिवे दिवे यथा नः वृधे।

**कठिन शब्दार्थ–नः** = हमारे लिए। **भद्राः** = कल्याणकारी। **क्रतवः** = सङ्कल्प, विचार। **यन्तुः** = आएँ। **विश्वतः** = चारों ओर से। **उद्भिदः** = प्रकट करने वाले।

**हिन्दी अनुवाद/भावार्थ**–हमारे पास चारों ओर से ऐसे कल्याणकारी विचार आते रहें जो किसी से न दबें, उन्हें कहीं से बाधित न किया जा सके (अपरीतासः) एवं अज्ञात विषयों को प्रकट करने वाले (उद्भिदः) हों। प्रगति को न रोकने वाले (अप्रायुवः) तथा सदैव रक्षा में तत्पर देवगण प्रतिदिन (सदैव) हमारी समृद्धि और कल्याण के लिए तत्पर रहें।

## प्रथमः पाठः

# शुचिपर्यावरणम्

## ( पवित्र/शुद्ध पर्यावरण )

**–कवि हरिदत्त शर्मा**

**पाठ परिचय**–प्रस्तुत पाठ आधुनिक संस्कृत कवि **हरिदत्त शर्मा** के रचना संग्रह **'लसल्लतिका'** से संकलित है। इसमें कवि ने महानगरों की यान्त्रिक-बहुलता से बढ़ते प्रदूषण पर चिन्ता व्यक्त करते हुए कहा है कि यह लौहचक्र तन-मन का शोषक है, जिससे वायुमण्डल और भूमण्डल दोनों मलिन हो रहे हैं। कवि महानगरीय जीवन से दूर, नदी-निर्झर, वृक्षसमूह, लताकुञ्ज एवं पक्षियों से गुञ्जित वन-प्रदेशों की ओर चलने की अभिलाषा व्यक्त करता है।

### अन्वय, कठिन शब्दार्थ, सप्रसंग हिन्दी अनुवाद/भावार्थ एवं पठितावबोधनम्–

( 1 )

**दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम्।**
**शुचि-पर्यावरणम्॥**
**महानगरमध्ये चलदनिशं कालायसचक्रम्।**
**मनः शोषयत् तनुः पेषयद् भ्रमति सदा वक्रम्॥**
**दुर्दान्तैर्दशनैरमुना स्यान्नैव जनग्रसनम्। शुचि...॥**

**अन्वयः**–अत्र जीवितं दुर्वहं जातम्, प्रकृतिः एव शरणम्। पर्यावरणं शुचि (स्यात्)। महानगरमध्ये कालायसचक्रम् अनिशं चलत्, मनः शोषयत्, तनुः पेषयद् सदा वक्रं भ्रमति। अमुना दुर्दान्तैः दशनैः जनग्रसनं नैव स्यात्। पर्यावरणं शुचि (स्यात्)।

**कठिन शब्दार्थ–जीवितम्** = जीवन (जीवनम्)। **दुर्वहम्** = कठिन, दूभर (दुष्करम्)। **जातम्** = हो गया है (यातम्)। **शुचि** = पवित्र, शुद्ध (पवित्रम्, शुद्धम्)। **कालायसचक्रम्** = लोहे का चक्र (लौहचक्रम्)। **अनिशम्** = दिन-रात (अहर्निशम्)। **शोषयत्** = सुखाते हुए (शुष्कीकुर्वत्)। **तनुः** = शरीर (शरीरम्)। **पेषयद्** = पीसते हुए (पिष्टीकुर्वन्)। **वक्रम्** = टेढ़ा (कुटिलम्)। **अमुना** = इससे (अनेन)। **दुर्दान्तैः** = भयानक से (भयङ्करैः)। **दशनैः** = दाँतों से (दन्तैः)। **जनग्रसनम्** = मानव विनाश (जनभक्षणम्)।

**प्रसंग**–प्रस्तुत पद्यांश हमारी पाठ्य-पुस्तक 'शेमुषी-द्वितीयो भागः' के 'शुचिपर्यावरणम्' नामक पाठ से लिया गया है। मूलतः यह पाठ कवि हरिदत्त शर्मा द्वारा रचित काव्य 'लसल्लतिका' से संकलित है। इस अंश में महानगरों में बढ़ते प्रदूषण पर चिन्ता व्यक्त करते हुए कवि कहता है कि–

**हिन्दी अनुवाद/भावार्थ**–इस संसार में जीवन अत्यधिक कठिन (दूभर) हो गया है, अतः प्रकृति की ही शरण में जाना चाहिए। पर्यावरण शुद्ध बना रहे। महानगरों के मध्य में प्रदूषणरूपी लौहचक्र दिन-रात चलता हुआ, मन को सुखाता हुआ और शरीर को पीसता हुआ सदा टेढ़ा चलता है। इसके भयानक दाँतों से मानव-विनाश नहीं होना चाहिए। अतः पर्यावरण शुद्ध होना चाहिए।

**पठितावबोधनकार्यम्–**

**निर्देशः–उपर्युक्तपद्यांशं पठित्वा एतदाधारितप्रश्नानामुत्तराणि यथानिर्देशं लिखत–**

**प्रश्नाः– ( क ) एकपदेन उत्तरत–**

अत्र किम् दुर्वहं जातम्?

**( ख ) पूर्णवाक्येन उत्तरत–**

महानगरमध्ये अनिशं किं चलति?

**( ग ) भाषिककार्यम्–**

(i) 'कालायसचक्रम्' इति कर्तृपदस्य क्रियापदं किम्?
(ii) 'शुचि-पर्यावरणम्'-इत्यत्र किं विशेष्यपदम्?